International Journal of Sanskrit Research 2016; 2(1): 47-49

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(1): 47-49
© 2016 IJSR
www.anantaajournal.com
Received: 13-11-2015
Accepted: 19-12-2015

**मुरारी कुमार मिश्र**
स्नातकोत्तर–व्याकरण–विभागः,
कामेश्वरसिंह दरभङ्गा संस्कृत
विश्वविद्यालयः, दरभंगा, बिहार,
भारत

**Corresponding Author:**
**मुरारी कुमार मिश्र**
स्नातकोत्तर–व्याकरण–विभागः,
कामेश्वरसिंह दरभङ्गा संस्कृत
विश्वविद्यालयः, दरभंगा, बिहार,
भारत

# संस्कृतव्याकरणशास्त्रपरम्परा

## मुरारी कुमार मिश्र

भाषा हि जनानां भावाभिव्यक्तये सशक्तं साधनम्। भाषासु श्रेष्ठा वर्तते संस्कृतभाषा, यतोहि विश्वस्य प्राचीनतमं साहित्यमत्रैवोपलभ्यते। किं नाम संस्कृतिमिति जिज्ञासितं चेत् परिष्कृतं, परिशुद्धं व्याकरणादिदोषरहितं यत् तत् संस्कृतम्। तर्हि किं नाम व्याकरणम् इति अपेक्षायाम् उच्यते, व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्। शब्द साधुत्वप्रतिपादकं शास्त्रं व्याकरणम् (वि+आ+कृ+ल्युट्) (अन्) इति। पतञ्जलिस्तु व्याकरणं शब्दानुशासनशब्देन व्यवहरति। यथा 'अथ शब्दानुशासनम्।' [1]

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवततेऽर्थभावेन प्रक्रिया जगतो यतः।।** [2]

वस्तुतः सर्वेषां ज्ञानविज्ञानानां मूलं वेदशास्त्रम्। तदपि शब्दाश्लिष्टम्। अतः शब्दाधीनं ज्ञानम् शब्दस्तु ब्रह्म एव। अर्थात् ब्रह्म एवं शब्दतत्त्वम्। तेन शब्दे यत्रत्वमस्ति तदेव ज्ञानम्। अपि च तत् तत्त्वमेव ब्रह्म इति। अथवा यदि शब्दाश्लिष्टं ज्ञानं तर्हि शब्दस्य ब्रह्मत्वेन ब्रह्माश्लिष्टं ज्ञानम्। एवं प्रकारेणास्माकं भारतीये वाङ्मये सर्वासां ज्ञानविज्ञानादिविद्यानाम् आदि प्रवक्ता कारणं वा ब्रह्मेति मन्यते। अतः सर्वेषां ज्ञानविज्ञानादिविविधविद्यानां मूलभूतस्य वेदस्याङ्गस्य व्याकरणशास्त्रस्यापि प्रथम प्रवक्ता ब्रह्मैवेति स्वीकर्तुं शक्यते। ब्रह्मणः व्याकरणशास्त्रस्यादिप्रवक्तृत्वं ऋक्तन्त्रकारेणापि स्वीकृतम्। यथा–

**ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो**
**भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः।** [3]

एवं प्रकारेण शास्त्रस्यास्य प्रथमप्रवक्ता ब्रह्माऽऽसीदिति ज्ञायते। विषयेऽस्मिन् चीनीयात्रिणा ह्वेनसांगमहोदयेन स्वकीये भारतभ्रमणवृत्तान्ते ''ब्रह्मदेवकृत व्याकरण'' शास्त्रस्य वर्णनं कृतम्। अतः विविधशास्त्राणां पर्यालोचनेनेदं [4] स्पष्टं भवति यदस्य प्रथमप्रवक्ता ब्रह्मेति। अपि च यदि ब्रह्मैवास्य प्रवक्ता तर्हि अस्य क्रमः एवं भवितुमर्हति। यथा–

ब्रह्मा → बृहस्पतिः
बृहस्पति → इन्द्रः
इन्द्रः → भरद्वाजः
भरद्वाजः → ऋषयः
ऋषयः → ब्राह्मणाः। इति।

द्वितीयः प्रवक्ता बृहस्पतिः देवानाम्पुरोहितः, सुराचार्यः, गुरुरेव बृहस्पतिः। [5] पातञ्जलमहाभाष्याज्ज्ञायते यद् बृहस्पतिः इन्द्राय दिव्यं वर्षसहस्रं यावत् ''शब्दपरायणं'' नाम व्याकरणशास्त्रम्प्रोवाच। [6] तेनास्य व्याकरणशास्त्रस्य प्रवक्तृत्वं सप्रमाणं सिद्ध्यति। अयमाचार्यः द्वितीयप्रवक्तृत्वेन विख्यातः।

अपि च तथ्यमिदं ब्रह्मवैवर्तपुराणसमालोचनेनापि सम्पुष्ट्यते। तत्र उद्धृतमस्ति यदिन्द्रः बृहस्पतिं शब्दशास्त्रं पप्रच्छ। यथा–

**पप्रच्छ शब्दशास्त्रञ्च महेन्द्रश्च बृहस्पतिम्।**
**दिव्यं वर्षसहस्रं च त्वां स दध्यौ च पुष्करे।।** [7]

एतदनन्तरमपि हेमबृहद्वृत्त्यवचूर्णि–यमलाष्टकतन्त्र–सारस्वतभाष्यादिग्रन्थेषु बृहस्पतेः व्याकरणशास्त्रप्रवक्तृत्वं समप्राणं सिद्ध्यति।

संस्कृतव्याकरणशास्त्रस्यैन्द्रसम्प्रदायप्रवर्तकः तृतीयः प्रवक्ता आदिमश्च संस्कर्त्ता इन्द्रो बभूव। अनुमीयते यद्व्याकरणस्य प्राचीने स्वरूपमतिक्लिष्टममासीदिति। महाभाष्ये पतञ्जलिर्निर्दिशति यद् बृहस्पतिरिन्द्राय प्रतिपदोक्तानां शब्दानामुपदेशं चकारेति। [8] इन्द्रश्च तस्य दुर्गमतां विचार्य प्रकृति–प्रत्ययविभागानुसारं सरलीचकार शास्त्रमिदम्। तद्यथा–'वाग्वै पराच्यव्याकृताऽवदत्। ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। [9] सायणचार्यस्तदित्थं व्याख्यातवान [10] 'तामखण्डां वाचं मध्ये विच्छिद्य प्रकृति–प्रत्ययविभागं सर्वत्राऽकरोत्'। केचन व्याकरणशास्त्रमिदमित्थं द्विधा विभजन्ते।

तद्यथा–1. ऐन्द्रः सम्प्रदायः, 2. माहेश्वर सम्प्रदायः च। तत्र कातन्त्रप्रभृतयः ऐन्द्राः। पाणिनिप्रमुखाः शैवाः। एवं बहुविधा व्याकरणप्रवक्तार आचार्याः समभवन्। येषां ग्रन्थसन्ततिर्भारतीयसंस्कृतवाङ्मयाऽऽगारे समुद्र इव प्रसृता। कस्तस्य पारं प्राप्तुं प्रभवेत्।

यद्यप्यैन्द्रसम्प्रदायस्य इन्द्रस्य वा स्वतन्त्ररूपेण कश्चनापि ग्रन्थविशेषः नोपलभ्यते, तथाप्यस्य सूत्राणि तु कुत्रचित् प्राप्यन्त एव। यथा–

1. शास्त्रेष्वपि– ''अथ वर्णसमूहः इत्यैन्द्रव्याकरणस्य।'' [11]
2. नैकपदजातम् यथा– ''अर्थः पदम् इत्यैन्द्राणाम्।'' [12]
3. 'संप्रयोगप्रयोजनम्' ऐन्द्रेऽभिहितम्। [13]
4. तथा चोक्तमिन्द्रेण– ''अन्त्यवर्णसमुद्भूताः धातवः परिकीर्तिताः।'' [14]

एवं प्रकारेण एतेषां सूत्राणामवलोकनेन ज्ञायते यदैन्द्राणां किञ्चन व्याकरणमासीदेव। यद्यपि ऐन्द्रव्याकरणात् प्राग्व्याकरणशास्त्रस्य स्वरूपमतीव विस्तृतमासीत्, परमैन्द्रव्याकरणे तदपेक्षया सूक्ष्मत्वं, वैज्ञानिकर्त्वागतम्। तथापि ग्रन्थोऽयम् अतीव विस्तृत एवासीदिति ज्ञायते।यथा–

**यानुज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात्।**
**पदरत्नानि किं तानि सन्ति पाणिनिगोस्पदे।।** [15]

ततः भरद्वाजः अङ्गिरसबृहस्पतेः पुत्रः, इन्द्रशिष्यश्च। ऋकतन्त्रानुसारेण [16] इन्द्रो भरद्वाजाय व्याकरणशास्त्रमुपदिदेशः भरद्वाजश्च ऋषिभ्यो व्याकरणशास्त्रम्प्रोवाच।

**सम्प्रदायाः** – सम्प्रति व्याकरणशास्त्रस्यावलोकनेन सम्प्रदायद्वयमत्र दृग्गोचरं भवति ऐन्द्र सम्प्रदायः माहेश्वरसम्प्रदायश्च। अत्र व्याकरणशास्त्रस्य सम्प्रदायविषये विद्वत्सु मतवैभिन्न्यं दृश्यते। यथा हेमबृहद्वृत्त्यवचूर्णीतिग्रन्थकर्त्रा स्वाभिमतं प्रकटितं यत्–

**ब्राह्मैशानमैन्द्रञ्च प्राजापत्यं बृहस्पतिम्।**
**त्वाष्ट्रमापिशलञ्चेति पाणिनीयमथाष्टमम्।।** [17]

महान् इतिहासज्ञः युधिष्ठिरमीमांसकः स्वकीये हस्तलेखे ''ऋग्वेदकल्पद्रुमे यमलाष्टकतन्त्रेऽष्टानां व्याकरणा'' नामुल्लेखं कृतवान्। [18]

**ब्राह्मं चान्द्रं, याम्यं, रौद्रं,**
**वायव्यं वारुणं, सौम्यं वैष्णवञ्चेति।**

एवं प्रकारेण ''रामायणे'' तत्र भगवता महाकविना वाल्मीकिना नवव्याकरणानामुल्लेखः कृतः। यथा–

**सोऽयं नवव्याकरणार्थवेत्ता।** [19]

श्रीतत्त्वनिधिनामके वैष्णवग्रन्थेऽपि [20] नवव्याकरणानामुल्लेखः दृश्यते। यथा–

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**
**सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्।।**

परं ''काशिकावृत्तौ'' [21] पञ्चव्याकरणानामुल्लेखः एव दृश्यते। यद्यपि एषां व्याकरणानां नाम न कुत्रापि उल्लिखितं वर्तते। तथापि ऐन्द्रं, चान्द्रं, काशकृत्स्नं, आपिशलं, पाणिनीयकञ्चैव सम्भाव्यते तत्र भवता युधिष्ठिरमीमांसकेन। [22] एवं प्रकारेण व्याकरणशास्त्रीय परम्परायाः वैयाकरणानामनुसारेणैव परम्परा कल्पिता, कल्प्यते च। यथा–

1. छान्दसम्–प्रातिशाख्यम्।
2. लौकिकम्–कातन्त्रम्
3. उभयविधानि– आपिशलपाणिनीयादीनि च। [23]

अथवा एतेषां व्याकरणानां वैयाकरणानां वा परम्पराऽध्ययनार्थमुभयथा विभाजनं कर्तुं शक्यते। यथा–

**क. पाणिनीयाष्टकेऽनुल्लिखिता आचार्याः –**

| | |
|---|---|
| 1. शिवः | 2. रौढ़िः |
| 3. चारायणः | 4. भागुरिः |
| 5. वायुः | 6. व्याडिः |
| 7. वैयाघ्रपद्यः | 8. काशकृत्स्नः |
| 9. पौष्करसादिः | 10. बृहस्पतिः |
| 11. शौनकिः | 12. माध्यन्दिनः |
| 13. शान्तनवः | 14. भरद्वाजः |
| 15. इन्द्रः | |

**ख. पाणिनीयाष्टक उल्लिखिताः आचार्याः –**

| | |
|---|---|
| 1. आपिशालिः | 2. काश्यपः |
| 3. शाकल्यः | 4. भारद्वाजः |
| 5. गालवः | 6. चाक्रवर्मणः |
| 7. गार्ग्यः | 8. सेनकः |
| 9. शाकटायनः | 10. स्फोटायनश्च। |

परमेतन्न समीचीनमवलोक्यते व्याकरणशास्त्रीयपरम्परा विभाजने। यतः व्याकरणशास्त्रे वैयाकरणानां परम्परायाः अध्ययनं आलोच्यो विषयः अपि चेयन्तु केवला वैयाकरणपरम्परा न तु व्याकरणशास्त्रीयपरम्परा। शास्त्रीयपरम्परा त्वेवं भवति यत् यदा शास्त्रे किञ्चन नूतनं परिवर्तनं भवति। यथा–पण्डितस्य पुत्रः पण्डितः, तस्यापि पुत्रः पण्डितः इति तस्य पण्डितपरम्परा। अपि च यदि तस्य कुले कश्चन मूर्खः पुत्रः संजातः, यस्य पुत्रोऽपि मूर्खः सञ्जातः तर्हि तस्य पण्डितपरम्परा परिवर्तिता भवति। ततः तस्य मूर्खपरम्परा प्रचलति। एवमेव परिवर्तनस्य यत्सोपानम् अथवा शास्त्रे यत्सोपानगतं परिवर्तनमायाति तदेव शास्त्रीयपरम्परा भवितुमर्हति। एवं प्रकारेणैव यदि एकस्यां परम्परायामेव यद्यनेके वैयाकरणाः सञ्जातास्तर्हि तन्न भवति परम्परापरिवर्तनम्। यदि केनचिद् वैयाकरणेन किंचन परिवर्तनं भवति तर्हि तद् भवति परम्परापरिवर्तनम्। यथाऽस्माकं व्याकरणशास्त्रे उक्तिरियं विख्याताऽस्ति–

**अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः।**

यतः प्राचीने काले शास्त्रमिदमासीत् ''पदपाठः''। परं तत्स्वरूपमतीव बृहदाकारं तेन क्रमशः सूत्रितं महर्षिभिः। फलतः समानप्रकृतिप्रत्ययञ्चान्विष्य प्रथमतः इन्द्रेण प्रकृतिप्रत्ययविभागात्मकं व्याकरणाशास्त्रं सम्पादितम्। पुनश्च लघ्वर्थमेव अनेकानि परिवर्तनानि शास्त्रेऽस्मिन् जातानि। एतदेव व्याकरणशास्त्रीयपरम्परा भवितुमर्हति। यतोऽत्र स्पष्टतया क्रमगतं परिवर्तनम् अवलोक्यते।

प्रकरणेऽस्मिन् एवं परम्परां स्वीकृत्य एव परम्पराणस्वागतामाचार्याणां क्रमगतोल्लेखः पौर्वापरमाध्यमेन क्रियते। अत्र मया व्याकरणशास्त्रीयपरम्परायां प्रामुख्येन चतस्रः परम्पराः स्वीकृताः। यथा–

| | |
|---|---|
| 1. शब्दपारायणम्। | 2.प्रकृतिप्रत्ययविभागात्कम्। |
| 3. सूत्रात्मकं व्याकरणशास्त्रम्। | 4. आधुनिकपरम्परा च। इति। |

**संदर्भ सूची**


1. महाभाष्य (पस्पशाह्निकम्) प्रथमं सूत्रं
2. वाक्यपदीयम् (ब्रह्मकाण्डम्) प्रथमश्लोकः
3. ऋकतन्त्र–1 / 4
4. ह्वेनसांग का भारत भ्रमण वृत्तान्त।
5. अमरकोषः–1 / 64
6. महाभाष्यम् (पस्पशाह्निके)
7. ब्रह्मवैवर्तपुराणम्, प्रकृतिखण्डः, अ.–05, श्लो.–27।
8. महाभाष्ये–1 / 1 / 1
9. तैत्तिरीयसंहिता–6 / 4 / 7
10. सायण ऋग्भाष्यउपोद्घात् पूना संस्करण भाग–1, पृ.–26
11. चरकन्यासः पृ.–58
12. निरूक्तवृत्तिः, पृ.–10
13. नाट्यशास्त्रम्, भाग–2, पृ.–233
14. पाणिनिप्रत्याहारस्योपरि नन्दिकेश्वरविरचितकाशिकायाः तत्वविमर्शिनी टीका, श्लोक–01
15. महाभारतम्, देवबोधकृतटीकायाम्, पृ.–750
16. ऋकतन्त्राम्–1 / 4
17. हेमबृहद्वृत्यवचूर्णिः, पृ.–03
18. ऋग्वेदकल्पद्रुम यमलाष्टकतन्त्र हस्तलेख युधिष्ठिरमीमांसकः, पृ.–114
19. वाल्मीकिरामायणम् उत्तरकाण्डम्–36 / 45, मद्रास लॉ जनरल प्रेस 1933।
20. श्रीतत्त्वनिधिः, भाग–01, पृ.–83 / 4।
21. काशिकावृत्तिः–4 / 2 / 60।
22. यु.मी. व्याकरणशास्त्रस्य इतिहासः, प्रथम भाग, पृ.–17।
23. यु.मी. व्याकरणशास्त्रस्य इतिहासः, प्रथम भाग, पृ.–07।